Date 09.08.20
Page 1

(9) अज्ञातशाखा ये वृक्षाः शिशिरे तांश्च रोपयेत् ।
जातशाखाश्च हेमन्ते रोपणीया विधानतः ।
सुस्कन्धा साखिनो ये तान् प्रावृट्काले तु रोपयेत् ॥
कस्येदं वाक्यम् ?

उत्तरम् – कश्यपस्य ।

(10) ग्रीष्मर्तौ कदा सेक्तव्याः वृक्षाः ?

उत्तरम् – सायं-प्रातः ।

(11) अन्तरं विंशतिर्हस्ताः वृक्षाणामुत्तमं स्मृतम् ।
मध्यमं षोडशं ज्ञेयमधमं द्वादशं स्मृतम् ॥
कस्योक्तिरियम् ?

उत्तरम् – कश्यपस्य ।

(12) इष्टापूर्तादिभिर्यज्ञैर्योजत् कुर्वन्ति मानवाः ।
अग्निष्टोमादिपशुभिरिष्टं यज्ञं प्रकीर्तितम् ॥
इति कस्य वचनम् ?

उत्तरम् – कश्यपस्य ।

(13) देवता कुत्र विहरन्ति ?

उत्तरम् – तडागेषु ।

(14) हरितोज्ज्वलतोयाढ्या वाप्या पक्षिभिरावृताः ।
वनोपवनमालिन्यो नित्यमुत्फुल्लितद्रुमाः ॥
इति कस्य वाक्यम् ?

उत्तरम् – कश्यपस्य ।

(15) कतिविधा प्रासादाः ?

उत्तरम् – विंशतिप्रकाराः ।

डॉ० सुधीर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेना,
पूर्णियाँ ।

बुधाष्टकवर्गः —

सौम्योऽन्त्यषण्णवायाप्तजेदिननात् स्यात् त्रिबन्धुखयुतेषु।
चन्द्राद् द्विरिपुस्वशायाष्टसुखगतः स्यात् साद्रिषु विलग्नात्।
प्रथमसुखायद्विनिधनधर्मेषु सितात् त्रिकोणसमेतेषु।
साशाम्बरेषु सौरारयोर्व्ययायरिपुवसुषु गुरोः॥

बुधः सूर्यात् १२।६।७।११।५ स्थितेषु शुभः। स्वस्थानात् १२।६।७।११।५।३।१।१० स्थितेषु शुभः। चन्द्रात् २।६।१०।११।८।४ स्थितेषु शुभः। लग्नात् २।६।१०।११।८।४।१ स्थितेषु शुभः। बुधः शुक्रात् १।४।११।२।८।७।३।५ स्थितेषु शुभः। शनैश्चरात् १।४।११।२।८।७।३।५।१०।९ स्थितेषु शुभस्तथा शनैश्चराद् भौमास्च १।४।११।२।८।७।३।५।१०।९ स्थितेषु शुभः। जीवात् १२।११।६।८ स्थितेषु शुभः। इति।

भावार्थः — रवि से १२।६।७।११।५ स्थानों में बुध शुभ होता है। बुध अपने स्थान से १२।६।७।११।५।३।१।१० स्थानों में शुभ, चन्द्रमा से २।६।१०।११।८।४ स्थानों में शुभ, लग्न से २।६।१०।११।८।४।१ स्थानों में शुभ, शुक्र से १।४।११।२।८।७।३।५ स्थानों में शुभ, शनि और भौम से १।४।११।२।८।७।३।५।१०।९ स्थानों में शुभ तथा गुरु से १२।११।६।८ स्थानों में स्थित रहने पर शुभ होता है।

डॉ० सुधीर कुमार
सहा०प्राध्यापक (ज्योतिष)
रा०उ०सं०महावि०सुखसेना, पूर्णियाँ

भौमाष्टकवर्गः—

भौमः स्वादायस्वाष्टकेन्द्रगस्त्र्यायषट्सुतेषु बुधात्।
जीवाद् दशाय-शत्रु-व्ययेष्विनाद्दुपचय-सुतेषु॥
उदयादुपचयतनुषु त्रिषडायेष्विन्दुतः समो दशमः।
शुक्रतोऽन्त्यषडष्टायेष्वसितात् केन्द्रायनवसुषु॥

भौमः स्वस्थानतः ११।२।८।७।४।९।१० स्तेषु शुभः। बुधात् ३।११।६।५ स्तेषु शुभः। जीवात् १०।११।६।१२ स्तेषु शुभः। सूर्यादुपचयसुतेषु ३।६।११।१०।५ स्तेषु शुभः। भौमो लग्नात् ३।६।११।१०।१ स्तेषु शुभः। इन्दुतः ३।६।११ स्तेषु शुभः। चन्द्राद् दशमे समः न शुभो नाऽप्यशुभः। शुक्रात् १२।६।८।११ स्तेषु शुभः। शनैश्चरात् १।४।९।१०।११।७।८ स्तेषु शुभः। इति।

भावार्थः— भौम अपने स्थान से ११।२।८।७।४।९।१० स्थानों में शुभ, बुध से ३।११।६।५ स्थानों में शुभ, बृहस्पति से १०।११।६।१२ स्थानों में शुभ, सूर्य से ३।६।११।१०।५ स्थानों में शुभ, लग्न से ३।६।११।१०।१ स्थानों में शुभ, और चन्द्रमा से ३।६।११ स्थानों में रहने पर शुभ होता है। चन्द्रमा से भौम दशम स्थान में हो तो सम होता है। शुक्र से १२।६।८।११ स्थानों में शुभ और शनि से १।४।९।१०। ११।७।८ स्थानों में भौम स्थित रहने पर शुभ होता है।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

## वस्तुनिष्ठप्रश्ना:

## शास्त्री-1, II

Date 05.08.20
Page 3

(1) पीलुवृक्षस्य कस्मिन् कोणे जलं भवति?

उत्तरम्- ईशानकोण।

(2) कस्य वृक्षस्य दक्षिणे जलं भवति?

उत्तरम्- वटवृक्षस्य।

(3) उदक्ककरीराद्वल्मीको दृश्यते चेज्जलं वदेत्।
चतुर्भिर्दक्षिणैः हस्तैः सार्धैर्दशनराद्धतः॥
नरे भेकः पीतवर्णो दृश्यते चिह्नमत्र हि॥
इति कस्य वाक्यम्?

उत्तरम्- गर्गस्य।

(4) कस्य वृक्षस्योत्तरेण वल्मीके सति जलं भवति?

उत्तरम्- शमीवृक्षस्य।

(5) शमीपलाशसंयुक्ता यत्र स्यात्तत्र पश्चिमे।
पञ्चहस्ताज्जलं वाच्यं षट्सप्तभि पुरुषैरधः॥
इति कथनं केनोक्तम्?

उत्तरम्- सारस्वतेन।

(6) अग्निकोणस्थः कूपः किं करोति?

उत्तरम्- भयं दाहञ्च करोति।

(7) वल्मीकपंक्त्यां यद्येकोऽभ्युच्छ्रितस्तदधो जलम्।
न रोहते शुष्यते वा यत्र सस्यं चतुष्करात्।
जलं तत्रैव निर्देश्यं भूमौ निःसंशयं तदा॥
इति कस्योक्तिः?

उत्तरम्- सारस्वतस्य।

(8) अशोकचम्पकारिष्टपुन्नागाश्च प्रियङ्गवः।
शिरीषोदुम्बराः श्रेष्ठाः पारिजातकमेव च॥
एते वृक्षाः शुभा ज्ञेयाः प्रथमं तांश्च रोपयेत्।
देवालये तपोद्याने गृहेषूपवनेषु च इति॥
कस्य वचनमिदम्?

उत्तरम्- कश्यपस्य।

P.T.O